# .. shrI shrI rAdhArasasudhAnidhiH ..

## ॥ श्री श्री राधारससुधानिधिः ॥

निन्दन्तं पुलकोत्करेण विकसन्नीपप्रसूनच्छविं
प्रोर्ध्वीकृत्य भुजद्वयं हरि हरीत्युच्चैर्वदन्तं मुहुः ।
नृत्यन्तं द्रुतमश्रुनिर्झरचयैः सिञ्चन्तमुर्वीतलं
गायन्तं निजपार्षदैः परिवृतं श्रीगौरचन्द्रं नुमः ॥ १॥
यस्याः कदापि वसनाञ्चलखेलनोत्थ
धन्यातिधन्यपवनेन कृतार्थमानी ।
योगीन्द्रदुर्गमगतिर्मधुसूदनोऽपि
तस्या नमोऽस्तु वृषभानुभुवो दिशेऽपि ॥ २॥
ब्रह्मेश्वरादिसुदुरूहपदारविन्द
श्रीमत्परागपरमाद्भुतवैभवायाः ।
सर्वार्थसाररसवर्षिकृपार्द्रदृष्टेस्-
तस्या नमोऽस्तु वृषभानुभुवो महिम्ने ॥ ३॥
यो ब्रह्मरुद्रशुकनारदभीष्ममुख्यैर्-
आलक्षितो न सहसा पुरुषस्य तस्य ।
सद्योवशीकरणचूर्णमनन्तशक्तिं
तं राधिकाचरणरेणुमनुस्मरामि ॥ ४॥
आधाय मूर्धनि यद् आपुरुदारगोप्यः
काम्यं पदं प्रियगुणैरपि पिच्छमौलेः ।
भावोत्सवेन भजतां रसकामधेनुं
तं राधिकाचरणरेणुमहं स्मरामि ॥ ५॥
दिव्यप्रमोदरससारनिजाङ्गसङ्ग
पीयूषवीचिनिचयैरभिषेचयन्ती ।
कन्दर्पकोटिशरमूर्च्छितनन्दसूनु
सञ्जीवनी जयति कापि निकुञ्जदेवी ॥ ६॥
तन् नः प्रतिक्षणचमत्कृतचारुलीला
लावण्यमोहनमहामधुराङ्गभङ्गि ।
राधाननं हि मधुराङ्गकलानिधानम्
आविर्भविष्यति कदा रससिन्धुसारम् ॥ ७॥
यत् किङ्करीषु बहुशः खलु काकुवाणी
नित्यं परस्य पुरुषस्य शिखण्डमौलेः ।
तस्याः कदा रसनिधेर्वृषभानुजायास्-
तत्केलिकुञ्जभुवनाङ्गणमार्जनी स्याम् ॥ ८॥



From http://sanskritdocuments.org

वृन्दानि सर्वमहतामपहाय दूराद्
वृन्दाटवीमनुसर प्रणयेन चेतः ।
सत्तारणीकृतसुभावसुधारसौघं
राधाभिधानमिह दिव्यनिधानमस्ति ॥ ९ ॥
केनापि नागरवरेण पदे निपत्य
सत्प्रार्थितैकपरिरम्भरसोत्सवायाः ।
सभ्रूविभङ्गमैत्रङ्गनिधेः कदा ते
श्रीराधिके नहि नहीति गिरः शृणोमि ॥ १० ॥
यत्पादपद्मनखमणिचन्द्रच्छटाया
विस्फूर्जितं किमपि गोपवधूस्वदर्शि ।
पूर्णानुरागरससागरसारमूर्तिः
सा राधिका मयि कदापि कृपां करोतु ॥ ११ ॥
उज्जृम्भमाणरसवारिनिधेस्तरङ्गैर्-
अङ्गैरिव प्रणयलोलविलोचनायाः ।
तस्याः कदा नु भविता मयि पुण्यदृष्टिर्-
वृन्दाटवीनवनिकुञ्जगृहाधिदेव्याः ॥ १२ ॥
वृन्दावनेश्वरि तवैव पदारविन्दं
प्रेमामृतैकमकरन्दरसौघपूर्णम् ।
हृद्यर्पितं मधुपतेः स्मरतापमुग्रं
निर्वापयत् परमशीतलमाश्रयामि ॥ १३ ॥
राधाकरावचितपल्लववल्लरीके
राधापदाङ्कविलसन्मधुरस्थलीके ।
राधा यशोमुखरमत्तखगावलीके
राधाविहारविपिने रमतां मनो मे ॥ १४ ॥
कृष्णामृतं चल विगाढुमितीरिताहं
तावत् सहस्व रजनी सखि यावद् एति ।
इत्थं विहस्य वृषभानुसुताह लप्स्ये
मानं कदा रसदकेलिकदम्बजातम् ॥ १५ ॥
पादाङ्गुलीनिहितदृष्टिमपत्रपिष्णुं
दूराद् वीक्ष्य रसिकेन्द्रमुखेन्दुबिम्बम् ।
वीक्षे चलत्पदगतिं चरिताभिरामां
झङ्कारनूपुरवतीं बत कर्हि राधाम् ॥ १६ ॥
उज्जागरं रसिकनागरसङ्गरङ्गैः
कुञ्जोदरे कृतवती नु मुदा रजन्याम् ।
सुस्नापिता हि मधुनैव सुभोजिता त्वं
राधे कदा स्वपिषि मत्करलालिताङ्घ्रिम् ॥ १७ ॥



From http://sanskritdocuments.org

विदग्ध्यसिन्धुरनुरागरसैकसिन्धुर्-
वात्सल्यसिन्धुरतिसान्द्रकृपैकसिन्धुः ।
लावण्यसिन्धुरमृतच्छविरूपसिन्धुः
श्रीराधिका स्फुरतु मे हृदि केलिसिन्धुः ॥ १८ ॥
दृष्ट्वैव चम्पकलतेव चमत्कृताङ्गी
वेणुध्वनिं क्व च निशम्य च विह्वलाङ्गी ।
सा श्यामसुन्दरगुणैरनुगीयमानैः
प्रीता परिष्वजतु मां वृषभानुपुत्री ॥ १९ ॥
श्रीराधिके सुरतरङ्गि नितम्बभागे
काञ्चीकलापकलहंस कलानुलापैः ।
मञ्जीरशिञ्जितमधुव्रतगुञ्जिताङ्घ्रि
पङ्केरुहैः शिशिरय स्वरसच्छटाभिः ॥ २० ॥
श्रीराधिके सुरतरङ्गि दिव्यकेलि
कल्लोलमालिनि लसद्वदनारविन्दे ।
श्यामामृताम्बुनिधिसङ्गमतीव्रवेगि
न्यावर्तनाभिरुचिरे मम सन्निधेहि ॥ २१ ॥
सत्प्रेमसिन्धुमकरन्दरसौघधारा
सारान् अजस्रमभितः स्रवदाश्रितेषु ।
श्रीराधिके तव कदा चरणारविन्दं
गोविन्दजीवनधनं शिरसा वहामि ॥ २२ ॥
सङ्केतकुञ्जमनु कुञ्जरमन्दगामि
न्यादाय दिव्यमृदुचन्दनगन्धमाल्यम् ।
त्वां कामकेलिरभसेन कदा चलन्तीं
राधेऽनुयामि पदवीमुपदर्शयन्ती ॥ २३ ॥
गत्वा कलिन्दतनयाविजनावतारम्
उद्वर्तयन्त्यमृतमङ्गमनङ्गजीवम् ।
श्रीराधिके तव कदा नवनागरेन्द्रं
पश्यामि मग्ननयनं स्थितमुच्चनीपे ॥ २४ ॥
सत्प्रेमराशिसरसो विकसत्सरोजं
स्वानन्दसीधुरससिन्धुविवर्धनेन्दुम् ।
तच्छ्रीमुखं कुटिलकुन्तलभृङ्गजुष्टं
श्रीराधिके तव कदा नु विलोकयिष्ये ॥ २५ ॥
लावण्यसाररससारसुखैकसारे
कारुण्यसारमधुरच्छविरूपसारे ।
वैदग्ध्यसाररतिकेलिविलाससारे
राधाभिधे मम मनोऽखिलसारसारे ॥ २६ ॥



From http://sanskritdocuments.org

चिन्तामणिः प्रणमतां व्रजनागरीणां
चूडामणिः कुलमणिर्वृषभानुनाम्नः ।
सा श्यामकामवरशान्तिमणिर्निकुञ्ज
भूषामणिर्हृदयसम्पूटसन्मणिर्नः ॥ २७॥
मञ्जुस्वभावमधि कल्पलतानिकुञ्जं
व्यञ्जन्तमद्भुतकृपारसपुञ्जमेव ।
प्रेमामृताम्बुधिमगाधमबाधमेतं
राधाभिधं द्रुतमुपाश्रय साधु चेतः ॥ २८॥
श्रीराधिकां निजविटेन सहालपन्तीं
शोणाधरप्रसृमरच्छविमञ्जरीकाम् ।
सिन्दूरसंवलितमौक्तिकपङ्क्तिशोभां
यो भावयेद् दशनकुन्दवतीं स धन्यः ॥ २९॥
पीतारुणच्छविमनन्ततडिल्लताभां
प्रौढानुरागमदविह्वलचारुमूर्तिम् ।
प्रेमास्पदां व्रजमहीपतितन्महिष्योर्-
गोविन्दमनसि तं निदधामि राधाम् ॥ ३०॥
निर्माय चारुमुकुटं नवचन्द्रकेण
गुञ्जाभिरारचितहारमुपाहरती ।
वृन्दाटवी नवनिकुञ्जगृहाधिदेव्याः
श्रीराधिके तव कदा भवतास्मि दासी ॥ ३१॥
सङ्केतकुञ्जमनुपल्लवमास्तरीतुं
तत्तत्प्रसादमभितः खलु संवरीतुम् ।
त्वां श्यामचन्द्रमभिसारयितुं धृताशे
श्रीराधिके मयि विधेहि कृपाकटाक्षम् ॥ ३२॥
दूराद् अपास्य स्वजनान् सुखमर्थकोटिं
सर्वेषु साधनवरेषु चिरं निराशः ।
वर्षन्तमेव सहजाद्भुतसौख्यधारां
श्रीराधिकाचरणरेणुमहं स्मरामि ॥ ३३॥
वृन्दाटवीप्रकटमन्मथकोटिमूर्तेः
कस्यापि गोकुलकिशोरनिशाकरस्य ।
सर्वस्वसम्पुटमिव स्तनशातकुम्भ
कुम्भद्वयं स्मर मनो वृषभानुपुत्र्याः ॥ ३४॥
सान्द्रानुरागरससारसरःसरोजं
किं वा द्विधा मुकुलितं मुखचन्द्रभासा ।
तन्नूतनस्तनयुगं वृषभानुजायाः
स्वानन्दसीधुमकरन्दघनं स्मरामि ॥ ३५॥



From http://sanskritdocuments.org

क्रीडासरःकनकपङ्कजकुट्मलाय
स्वानन्दपूर्णरसकल्पतरोः फलाय ।
तस्मै नमो भुवनमोहनमोहनाय
श्रीराधिके तव नवस्तनमण्डलाय ॥ ३६॥
पत्रावलीं रचयितुं कुचयोः कपोले
बन्धुं विचित्रकवरीं नवमल्लिकाभिः ।
अङ्गं च भूषयितुमाभरणैर्धृताशे
श्रीराधिके मयि विधेहि कृपावलोकम् ॥ ३७॥
श्यामेति सुन्दरवरेति मनोहरेति
कन्दर्पकोटिललितेति सुनागरेति ।
सोत्कण्ठमह्नि गृणती मुहुराकुलाक्षी
सा राधिका मयि कदा नु भवेत् प्रसन्ना ॥ ३८॥
वेणुः करान् निपतितः स्खलितं शिखण्डं
भ्रष्टं च पीतवसनं व्रजराजसूनोः ।
यस्याः कटाक्षशरघातविमूर्च्छितस्य
तां राधिकां परिचरामि कदा रसेन ॥ ३९॥
तस्या अपाररससारविलासमूर्तेर्-
आनन्दकन्दपरमाद्भुतसौम्यलक्ष्म्याः ।
ब्रह्मादिदुर्गमगतेर्वृषभानुजायाः
कैङ्कर्यमेव मम जन्मनि जन्मनि स्यात् ॥ ४०॥
पूर्णानुरागरसमूर्तितडिल्लताभं
ज्योतिः परं भगवतो रतिमद्रहस्यम् ।
यत् प्रादुरस्ति कृपया वृषभानुगेहे
स्यात् किङ्करी भवितुमेव ममाभिलाषः ॥ ४१॥
प्रेमोल्लसद्रसविलासविकाशकन्दं
गोविन्दलोचनवितृप्तचकोरपेयम् ।
सिञ्चन्तमद्भुतरसामृतचन्द्रीकौघैः
श्रीराधिकावदनचन्द्रमहं स्मरामि ॥ ४२॥
सङ्केतकुञ्जनिलये मृदुपल्लवेन
क्लृप्ते कदापि नवसङ्गभयत्रपाढ्याम् ।
अत्याग्रहेण कववारिरुहे ग्र्हीत्वा
नेष्ये विटेन्द्रशयने वृषभानुपुत्रीम् ॥ ४३॥
सुगन्धमाल्यनवचन्द्रलवङ्गसङ्ग
ताम्बूलसम्पुटमधीश्वरि मां वहन्तीम् ।
श्यामं तमुन्मदरसाद् अभिसंसरन्ती
श्रीराधिके करुणयानुचरीं विधेहि ॥ ४४॥



From http://sanskritdocuments.org

श्रीराधिके तव नवोद्गमचारुवृत्त
वक्षोजमेव मुकुलद्वयलोभनीयम् ।
श्रोणीं दधद्रसगुणैरुपचीयमानं
कैशोरकं जयति मोहनचित्तचौरम् ॥ ४५॥
संलापमुच्छलदनङ्गतरङ्गमाला
सङ्क्षोभितेन वपुषा व्रजनागरेण ।
प्रत्यक्षरं क्षरदपाररसामृताब्धिं
श्रीराधिके तव कदान् नु शृणोम्यदूरात् ॥ ४६॥
अङ्कस्थितेऽपि दयिते किमपि प्रलापं
हा मोहनेति मधुरं विदधत्यकस्मात् ।
श्यामानुराग मदविह्वलमोहनाङ्गी
श्यामामणिर्जयति कापि निकुञ्जसीम्नि ॥ ४७॥
कुञ्जान्तरे किमपि जातरसोत्सवायाः
श्रुत्वा तदालापितशिञ्जितमिश्रितानि ।
श्रीराधिके तव रहःपरिचारिकाहं
द्वारस्थिता रसह्रदे पतिता कदा स्याम् ॥ ४८॥
वीणां करे मधुमतीं मधुरस्वरां ताम्
आधाय नागरशिरोमणिभावलीलाम् ।
गायन्त्यहो दिनमपारमिवाश्रुवर्षैर्-
दुःखान् नयन्त्यहह सा हृदि मेऽस्तु राधा ॥ ४९॥
अन्योन्यहासपरिहासविलासकेली
वैचित्र्यजृम्भितमहारसवैभवेन ।
वृन्दावने विलसतापहृतं विदग्ध
द्वन्द्वेन केनचिद् अहो हृदयं मदीयम् ॥ ५०॥
महाप्रेमोन्मीलन्नवरससुधासिन्धुलहरी
परीवारैर्विश्वं स्नपयद् इव नेत्रान्तनटनैः ।
तडिन्मालागौरं किमपि नवकैचोरमधुरं
पुरन्ध्रीणां चुडाभरणनवरत्नं विजयते ॥ ५१॥
अमन्दप्रेमाङ्कश्लथसकलनिर्बन्धहृदयं
दयापारं दिव्यच्छविमधुरलावण्यललितम् ।
अलक्ष्यं राधाख्यं निखिलनिगमैरप्यतितरां
रसाम्भोधेः सारं किमपि सुकुमारं विजयते ॥ ५२॥
दुकूलं बिभ्राणमथ कुचतटे कञ्चुकपटं
प्रसादं स्वामिन्याः स्वकरतलदत्तं प्रणयतः ।
स्थितां नित्यं पार्श्वे विविधपरिचर्यैकचतुरां
किशोरीमात्मानं किमिह सुकुमारीं नु कलये ॥ ५३॥



From http://sanskritdocuments.org

विचिन्वन्ती केशान् क्वचन करजैः कञ्चुकपटं
क्व चाप्यामुञ्चन्ती कुचकनकदीव्यत्कलशयोः ।
सुगुल्फे न्यस्यन्ती क्वचन मणिमञ्जीरयुगलं
कदा स्यां श्रीराधे तव सुपरिचारिण्यहमहो ॥ ५४॥
अतिस्नेहाद् उच्चैरपि च हरिनामानि गृणतस्-
तथा सौगन्धाद्यैर्बहुभिरुपचारैश्च यजतः ।
परानन्दं वृन्दावनमनुचरन्तं च दधतो
मनो मे राधायाः पदमृदुलपद्मे निवसतु ॥ ५५॥
निजप्राणेश्वर्या यद् अपि दयनीयेन्यमिति मां
मुहुश्चुम्बत्यालिङ्गतिसुरतमाध्व्या मदयति ।
विचित्रां स्नेहर्धिं रचयति तथाप्यद्भुतगतेस्-
तवैव श्रीराधे पदरसविलासे मम मनः ॥ ५६॥
प्रीतिं कामपि नाममात्रजनितप्रोद्दामरोमोद्गमां
राधामाधवयोः सदैव भजतोः कौमार एवोज्ज्वलाम् ।
वृन्दारण्यनवप्रसूननिचयान् आनीय कुञ्जान्तरे
गूढं शैशवखेलनैर्बत कदा कार्यो विवाहोत्स्वः ॥ ५७॥
विपञ्चितसुपञ्चमं रुचिरवेणुना गायता
प्रियेण सह वीणया मधुरगानविद्यानिधिः ।
करीन्द्रवनसम्मिलन्मदकरिण्युदारक्रमा
कदा नु वृषभानुजा मिलतु भानुजारोधसि ॥ ५८॥
सहासवरमोहनाद्भुतविलासरसोत्सवे
विचित्रवरताण्डवश्रमजलार्द्रगण्डस्थलौ ।
कदा नु वरनागरीरसिकशेखरौ तौ मुदा
भजामि पदलालनाल् ललितवीजनं कुर्वती ॥ ५९॥
वृन्दारण्यनिकुञ्जमञ्जुलगृहेष् आत्मेश्वरीं मार्गयन्
हा राधे सविदग्धदर्शितपथं किं यासि नेत्यालपन् ।
कालिन्दीसलिले च तत्कुचतटीकस्तूरिकापङ्किले
स्नायं स्नायमहो कुदेहजमलं जह्यां कदा निर्मलः ॥ ६०॥
पादस्पर्शरसोत्सवं प्रणतिभिर्गोविन्दमिन्दीवर
श्यामं प्रार्थयितुं सुमञ्जुलरहःकुञ्जांश्च सम्मार्जितुम् ।
मालाचन्दनगन्धपूररसवत्ताम्बूलसत्पानकान्य्
आदातुं च रसैकदायिनि तव प्रेष्या कदा स्यामहम् ॥ ६१॥
लावण्यामृतवार्तया जगद् इदं सम्प्लावयन्ती शरद्
राकाचन्द्रमनन्तमेव वदनज्योत्स्नाभिरातन्वती ।
श्रीवृन्दावनकुञ्जमञ्जुगृहिणी काप्यस्ति तुच्छामहो
कुर्वाणाखिलसाध्यसाधनकथां दत्त्वा स्वदास्योत्सवम् ॥ ६२॥


From http://sanskritdocuments.org

दृष्ट्या यत्र क्वचन विहिताम्रेडने नन्दसूनोः
प्रत्याख्यानच्छलत उदितोदारसङ्केतदेशा ।
धूर्तेन्द्र त्वद्वयमुपगता सा रहो नीपवाट्यां
नैका गच्छेत् कितव कृतमित्यादिशेत् कर्हि राधा ॥ ६३॥
सा भ्रूनर्तनचातुरी निरुपमा सा चारुनेत्राञ्चले
लीलाखेलनचातुरी वरतनोस्तादृग्वचो चातुरी ।
सङ्केतागम चातुरी नवनवक्रीडाकला चातुरी
राधाया जयतात् सखीजनपरीहासोत्सवे चातुरी ॥ ६४॥
उन्मीलन्मिथुनानुरागगरिमोदारस्फुरन्माधुरी
धारासारधुरीणदिव्यललितानङ्गोत्सवैः खेलतोः ।
राधामाधवयोः परं भवतु नश्चित्ते चिरार्तिस्पृशोः
कौमारे नवकेलिशिल्पलहरीशिक्षादिदीक्षारसः ॥ ६५॥
कदा वा खेलन्तौ व्रजनगरवीथिषु हृदयं
हरन्तौ श्रीराधाव्रजपतिकुमारौ सुकृतिनः ।
अकस्मात् कौमारे प्रकटनवकैशोरविभवौ
प्रपश्यन् पूर्णः स्यां रहसि परिहासादिनिरतौ ॥ ६६॥
धम्मिल्लं ते नवपरिमलैरुल्लसत्फुल्लमल्ली
मालं भालस्थलमपि लसत्सान्द्रसिन्दूरबिन्दु ।
दीर्घापाङ्गच्छविमनुपमां चारुचन्द्रांशुहासं
प्रेमोल्लासं तव तु कुचयोर्द्वन्द्वमन्तः स्मरामि ॥ ६७॥
लक्ष्मीकोटीविलक्षलक्षणलसल्लीलाकिशोरीशतैर्-
आराध्यं व्रजमण्डलेऽतिमधुरं राधाभिधानं परम् ।
ज्योतिः किञ्चन सिञ्चदुज्ज्वल
रसप्राग्भावमाविर्भवद्
राधे चेतसि भूरिभाग्यविभवैः कस्याप्यहो जृम्भते ॥ ६८॥
तज्जीयान् नवयौवनोदयमहालावण्यलीलामयं
सान्द्रानन्दघनानुरागघटितश्रीमूर्तिसम्मोहनम् ।
वृन्दारण्यनिकुञ्जकेलिललितं काश्मीरगौरच्छवि
श्रीगोविन्द इव व्रजेन्द्रगृहिणीप्रेमैकपात्रं महः ॥ ६९॥
प्रेमानन्दरसैकवारिधिमहाकल्लोलमालाकुला
व्यालोलारुणलोचनाञ्चलचमत्कारेण सञ्चिन्वती ।
किञ्चित् केलिकलामहोत्सवमहो वृन्दाटवीमन्दिरे
नन्दत्यद्भुतकामवैभवमयी राधा जगन्मोहिनी ॥ ७०॥
वृन्दारण्यनिकुञ्जसीमनि नवप्रेमानुभावभ्रमद्
भ्रूभङ्गीलवमोहितव्रजमणिर्भक्तैकचिन्तामणिः ।
सान्द्रानन्दरसामृतस्रवमणिः प्रोद्दामविद्युल्लता


From http://sanskritdocuments.org

कोटिज्योतिरुदेति क्वापि रमणीचुडामणिर्मोहिनी ॥ ७१॥
लीलापाङ्गतरङ्गितैरुदभवन्न् एकैकशः कोटिशः
कन्दर्पाः पुरुदर्पटङ्कृतमहाकोदण्डविस्फारिणः ।
तारुण्यप्रथमप्रवेशसमये यस्या महामाधुरी
धारानन्तचमत्कृता भवतु नः श्रीराधिका स्वामिनी ॥ ७२॥
यत्पादाम्बुरुहैकरेणुकणिका

मूर्ध्ना निधातुं नहि
प्रापुर्ब्रह्मशिवादयोऽप्यधिकृतिं गोप्येकभावाश्रयः ।
सापि प्रेमसुधारसाम्बुनिधी राधापि साधारणी
भूता कालगतिक्रमेण बलिना हे दैव तुभ्यं नमः ॥ ७३॥
दूरे स्निघ्धपरम्परा विजयतां दूरे सुहृन्मण्डली
भृत्याः सन्तु विदूरतो व्रजपतेरन्यः प्रसङ्गः कुतः ।
यत्र श्रीवृषभानुजा कृतरतिः कुञ्जोदरे कामिना
द्वारस्था प्रियकिङ्करी परमहं श्रोष्यामि काञ्चिध्वनिम् ॥ ७४॥
गौराङ्गे म्रदिमा स्मिते मधुरिमा नेत्राञ्चले द्राघिमा
वक्षोजे गरिमा तथैव तनिमा मध्ये गतौ मन्दिमा ।
श्रोण्यां च प्रथिमा भुवोः कुटिलिमा बिम्बाधरे शोणिमा
श्रीराधे हृदि ते रसेन जडिमा ध्यानेऽस्तु मे गोचरः ॥ ७५॥
प्रातः पीतपटं कदा व्यपनयाम्यन्यांशुकस्यार्पणात्
कुञ्जे विस्मृतकञ्चुकीमपि समानेतुं प्रधावामि वा ।
बध्नीयां कवरीं युनज्मि गलितां मुक्तावलीमञ्जये
नेत्रे नागरि रङ्गकैश्च पिदध्
आम्यङ्गव्रणं वा कदा ॥ ७६॥
यद् वृन्दावनमात्रगोचरमहो यन् न श्रुतीकं शिरोऽप्य्
आरोढुं क्षमते न यच्छिवशुकादीनां तु यद् ध्यानगम् ।
यत् प्रेमामृतमाधुरीरसमयं यन् नित्यकैशोरकं
तद् रूपं परिवेष्ट्रमेव नयनं लोलायमानं मम ॥ ७७॥
धर्माद्यर्थचतुष्टयं विजयतां किं तद् वृथावार्तया
सैकान्तेश्वरभक्तियोगपदवी त्वारोपिता मूर्धनि ।
या वृन्दावनसीम्नि काचन घनाश्चर्या किशोरीमणिस्-
तत्कैङ्कर्यरसामृताद् इह परं चित्ते न मे रोचते ॥ ७८॥
प्रेम्णः सन्मधुरोज्ज्वलस्य हृदयं शृङ्गारलीलाकला
वैचित्रीपर्मावधिर्भगवतः पूज्यैव कापीशता ।
ईशानी च शची महासुखतनुः शक्तिः स्वतन्त्रा परा
श्रीवृन्दावननाथपट्टमहिषी राधैव सेव्या मम ॥ ७९॥



From http://sanskritdocuments.org

राधादास्यमपास्य यः प्रयतते गोविन्दसङ्गाशया
सोऽयं पूर्णसुधारुचेः परिचयं राकां विना काङ्क्षति ।
किं च श्यामरतिप्रवाहलहरीबीजं न मे तां विदुः
ते प्राप्यापि महामृताम्बुधिमहो बिन्दुं परं प्राप्नुयुः ॥ ८०॥
कैशोराद्भुतमाधुरीभरधुरीणाङ्गच्छविं राधिकां
प्रेमोल्लासभराधिकां निरवधि ध्यायन्ति ये तद्धियः ।
त्यक्ताः कर्मभिरात्मनैव भगवद्धर्मेऽप्यहो निर्ममाः
सर्वाश्चर्यगतिं गता रसमयीं तेभ्यो महद्भयो नमः ॥ ८१॥
लिखन्ति भुजमूलतो न खलु शङ्खचक्रादिकं
विचित्रहरिमन्दिरं न रचयन्ति भालस्थले ।
लसत्तुलसिमालिकां दधति कण्ठपीठे न वा
गुरोर्भजनविक्रमात् क इह ते महाबुद्धयः ॥ ८२॥
कर्माणि श्रुतिबोधितानि नितरां कुर्वन्तु कुर्वन्तु मा
गूढाश्चर्यरसाः स्रगादिविषयान् गृह्णन्तु मुञ्चन्तु वा ।
कैर्वा भाव रहस्यपारगमतिः श्रीराधिकाप्रेयसः
किञ्चिज्ज्ञैरनुयुज्यतां बहिरहो भ्राम्यद्भिरन्यैरपि ॥ ८३॥
अलं विषयवार्तया नरककोटिबीभत्सया
वृथा श्रुतिकथाश्रमो बत बिभेमि कैवल्यतः ।
परेशभजनोन्मदा यदि शुकादयः किं ततः
परं तु मम राधिकापदरसे मनो मज्जतु ॥ ८४॥
तत् सौन्दर्यं स च नवनवो यौवनश्रीप्रवेशः
सा दृग्भङ्गी स च रसघनाश्चर्यवक्षोजकुम्भः ।
सोऽयं बिम्बाधरमधुरिमा तत् स्मितं सा च वाणी
सेयं लीलागतिरपि न विस्मर्यते राधिकायाः ॥ ८५॥
यल् लक्ष्मीशुकनारदादिपरमाश्चर्यानुरागोत्सवैः
प्राप्तं त्वत्कृपयैव हि व्रजभृतां तत्तत्किशोरीगणैः ।
तत्कैङ्कर्यमनुक्षणाद्भुतरसं प्राप्तुं धृताशे मयि
श्रीराधे नवकुञ्जनागरि कृपादृष्टिं कदा दास्यसि ॥ ८६॥
लब्ध्वा दास्यं तदतिकृपया मोहनस्वादितेन
सौन्दर्यश्रीपदकमलयोर्लालनैः स्वापितायाः ।
श्रीराधाया मधुरमधुरोच्छिष्टपीयूषसारं
भोजं भोजं नवनवरसानन्दमग्नाः कदा स्याम् ॥ ८७॥
यदि स्नेहाद् राधे दिशसि रतिलाम्पट्यपदवीं
गतं मे स्वप्रेष्ठं तद् अपि मम निष्ठां शृणु यथा ।
कटाक्षैरालोके स्मितसहचरैर्जातपुलकं
समाश्लिष्याम्युच्चैरथ च रसये त्वत्पदरसम् ॥ ८८॥


From http://sanskritdocuments.org

कृष्णः पक्षो नवकुवलयं कृष्णसारस्तमालो
नीलाम्भोदस्तव रुचिपदं नामरूपैश्च कृष्णा ।
कृष्णे कस्मात् तव विमुखता मोहनश्याममूर्ताव्
इत्युक्त्वा त्वां प्रहसितमुखीं किं नु पश्यामि राधे ॥ ८९॥
लीलापाङ्गतरङ्गितैरिव दिशो नीलोत्पलश्यामला
दोहायत्कनकाद्रिमण्डलमिव व्योम स्तनैस्तन्वतीम् ।
उत्फुल्लस्थलपङ्कजामिव भुवं रासे पदन्यासतः
श्रीराधामनुधावतीं व्रजकिशोरीणां घटां भावये ॥ ९०॥
दृशौ त्वयि रसाम्बुधौ मधुरमीनवद् भ्राम्यतः
स्तनौ त्वयि सुधासरस्यहह चक्रवाकाविव ।
मुखं सुरतरङ्गिणि त्वयि विकासि हेमाम्बुजं
मिलन्तु मयि राधिके तव कृपातरङ्गच्छटाः ॥ ९१॥
कान्ताढ्याश्चर्यकान्ता कुलमणिकमला कोटीकाम्यैकपादा
म्भोजभ्राजन्नखेन्दुच्छविलवविभवा काप्यगम्या किशोरी ।
उन्मर्यादप्रवृद्धप्रणयरसमहाम्भोधिगम्भीरलीला
माधुर्योज्जृम्भिताङ्गी मयि किमप्
इ कृपारङ्गमङ्गीकरोतु ॥ ९२॥
कलिन्दगिरिनन्दिनीपुलिनमालतीमन्दिरे
प्रविष्टवनमालिना ललितकेलिलोलीकृते ।
प्रतिक्षणचमत्कृताद्भुतरसैकलीलानिधे
निधेहि मयि राधिके निजकृपातरङ्गच्छटाम् ॥ ९३॥
यस्यास्ते बत किङ्करीषु बहुशश्चाटूनि वृन्दाटवी
कन्दर्पः कुरुते तवैव किमपि प्रेप्सुः प्रसादोत्सवम् ।
सान्द्रानन्दघनानुरागलहरीनिस्यन्दपादाम्बुज
द्वन्द्वे श्रीवृषभानुनन्दिनि सदा वन्दे तव श्रीपदम् ॥ ९४॥
यज्जापः सकृद् एव गोकुलपतेराकर्षकस्तत्क्षणाद्
यत्र प्रेमवतां समस्तपूरुषार्थेषु स्फुरेत् तुच्छता ।
यन्नामाङ्कितमन्त्रजापनपरः प्रीत्या स्वयं माधवः
श्रीकृष्णोऽपि तद् अद्भुतं स्फुरतु मे राधेति वर्णद्वयम् ॥ ९५॥
कालिन्दीतटकुञ्जरमन्दिरगतो योगीन्द्रवद् यत्पद
ज्योतिर्ध्यानपरः सदा जपति यां प्रेमाश्रुपूर्णो हरिः ।
केनाप्यद्भुतमुल्लसद्रतिरसानन्देन सम्मोहितः
सा राधेति सदा हृदि स्फुरतु मे विद्या परा द्व्यक्षरा ॥ ९६॥
देवानामथ भक्तमुक्तसुहृदामत्यन्तदूरं च यत्
प्रेमानन्दरसं महासुखकरं चोच्चारितं प्रेमतः ।
प्रेम्णाकर्णयते जपत्यथ मुदा गायत्यथालिष्वयं


From http://sanskritdocuments.org

जल्पत्यश्रुमुखो हरिस्तदमृतं राधेति मे जीवनम् ॥ ९७॥
या वाराधयति प्रियं व्रजमणिं प्रौढानुरागोत्सवैः
संसिध्यन्ति यदाश्रयेण हि परं गोविन्दसख्युत्सुकाः ।
यत् सिद्धिः परमापदैकरसवत्याराधनान्ते नु सा
श्रीराधा श्रुतिमौलिशेखरलता नाम्नी मम प्रीयताम् ॥ ९८॥
गात्रे कोटितडिच्छवि प्रविततानन्दच्छवि श्रीमुखे
बिम्बौष्ठे नवविद्रुमच्छवि करे सत्पल्लवैकच्छवि ।
हेमाम्भोरुहकुड्मलच्छवि कुचद्वन्द्वेऽरविन्देक्षणं
वन्दे तन्नवकुञ्जकेलिमधुरं राधाभिधानं महः ॥ ९९॥
मुक्तापङ्क्तिप्रतिमदशना चारुबिम्बाधरौष्ठी
मध्ये क्षामा नवनवरसावर्तगम्भीरनाभिः ।
पीनश्रोणिस्तरुणिमसमुन्मेषलावण्यसिन्धुर्-
वैदग्धीनां किमपि हृदयं नागरी पातु राधा ॥ १००॥
स्निग्धाकुञ्चितनीलकेशि विदलद्बिम्बोष्ठिचन्द्रानने
खेलत्खञ्जनगञ्जनाक्षि रुचिमन्नासाग्रमुक्ताफले ।
पीनश्रोणि तनूदरि स्तनतटीवृत्तच्छटात्यद्भुते
श्रीराधे भुज वल्लिचारुवलये स्वं रूपमाविष्कुरु ॥ १०१॥
लज्जान्तःपटमारचय्य रचितस्मायप्रसूनाञ्जलौ
राधाङ्गे नवरङ्गधाम्नि ललितप्रस्तावेन यौवने ।
श्रोणीहेमवरासने स्मरनृपेणाध्यासिते मोहनं
लीलापाङ्गविचित्रताण्डवकलापाण्डित्यमुन्मीलति ॥ १०२॥
सा लावण्यचमत्कृतिर्नववयो रूपं च तन्मोहनं
तत्तत्केलिकलाविलासलहरीचातुर्यमाश्चर्यभूः ।
नो किञ्चित् कृतमेव यत्र न नुतिर्नागो न वा सम्भ्रमो
राधामाधवयोः स कोऽपि सहजः प्रेमोत्सवः पातु वः ॥ १०३॥
येषां प्रेक्षां वितरति नवोदारगाढानुरागान्
मेघश्यामो मधुरमधुरानन्दमूर्तिर्मुकुन्दः ।
वृन्दाटव्यां सुमहिमचमत्कारकारीण्यहो किं
तानि प्रेक्षेऽद्भुतरसनिधानानि राधापदानि ॥ १०४॥
बलान् नीत्वा तल्पे किमपि परिरभ्याधरसुधां
निपीय प्रोल्लिख्य प्रखरनखरेण स्तनभरम् ।
ततो नीवीं न्यस्ते रसिकमणिना त्वत्करधृते
कदा कुञ्जच्छिद्रे भवतु मम राधेऽनुनयनम् ॥ १०५॥
करं ते पत्रालिं किमपि कुचयोः कर्तुमुचितं
पदं ते कुञ्जेषु प्रियमभिसरन्त्या अभिसृतौ ।
दृशौ कुञ्जच्छिद्रैस्तव निभृतकेलिं कलयितुं



From http://sanskritdocuments.org

यदा वीक्षे राधे तद् अपि भविता किं शुभदिनम् ॥ १०६ ॥
रहोगोष्ठीं श्रोतुं तव निजविटेन्द्रेण ललितां
करे धृत्वा त्वां वा नवरमणतल्पे घटयितुम् ।
रतामर्दस्रस्तं कचभरमथो संयमयितुं
विदध्याः श्रीराधे मम किमधिकारोत्सवरसम् ॥ १०७ ॥
वृन्दाटव्यां नवनवरसानन्दपुञ्जे निकुञ्जे
गुञ्जद्भृङ्गीकुलमुखरिते मञ्जुमञ्जुप्रहासैः ।
अन्योन्यक्षेपणनिचयनप्राप्तसङ्गोपनाद्यैः
क्रीडज्जीयाद् रसिकमिथुनं क्लृप्तकेलीकदम्बम् ॥ १०८ ॥
रूपं शारदचन्द्रकोटिवदने धम्मिल्लमल्लीस्रजाम्
आमोदैर्विकलीकृतालिपटले राधे कदा तेऽद्भुतम् ।
ग्रैवेयोज्ज्वलकम्बुकण्ठि मृदुदोर्वल्लीचलत्कङ्कणे
वीक्षे पट्टदुकुलवासिनि र
णन्मञ्जीरपादाम्बुजे ॥ १०९ ॥
इतो भयमितस्त्रपाकुलमितो यशः श्रीरितो
हिनस्त्यखिलशृङ्खलामपि सखीनिवासस्त्वया ।
सगद्गदमुदीरितं सुबहुमोहनाकाङ्क्षया
कथं कथमयीश्वरि प्रहसितैः कदा म्रेड्यसे ॥ ११० ॥
श्यामे चाटुरुतानि कुर्वति सहालापान् प्रणत्री मया
गृह्णाने च दुकूलपल्लवमहो हुङ्कृत्य मां द्रक्ष्यसि ।
बिभ्राणे भुजवल्लीमुल्लसितया रोमस्रजालङ्कृतात्
दृष्ट्वा त्वां रसलीनमूर्तिमथ किं पश्यामि हास्यं ततः ॥ १११ ॥
अहो रसिकशेखरः स्फुरति कोऽपि वृन्दाटवी
निकुञ्जनवनागरीकुचकिशोरकेलिप्रियः ।
करोतु स कृपां सखीप्रकटपूर्णनत्युत्सवो
निजप्रयतमापदे रसमयेऽधद् यः शिरः ॥ ११२ ॥
विचित्रवरभूषणोज्ज्वलदुकूलसत्कञ्चुकैः
सखीभिरिति भूषिता तिलकगन्धमाल्यैरपि ।
स्वयं च सकलाकलासु कुशलीकृता नः कदा
सुरासमधुरोत्सवे किमपि वेशयेत् स्वामिनी ॥ ११३ ॥
कदा सुमणिकिङ्किणीवलयनूपुरप्रोल्लसन्
महामधुरमण्डलाद्भुतविलासरासोत्सवे ।
अपि प्रणयिनो बृहद्भुजगृहीतकण्ठ्यो वयं
परं निजरसेश्वरीचरणलक्ष्म वीक्षामहे ॥ ११४ ॥
यद् गोविन्दकथासुधारसह्रदे चेतो मया जृम्भितं
यद् वा तद्गुणकीर्तनार्चनविभूषाद्यैर्दिनं प्रापितम् ।


From http://sanskritdocuments.org

यद् यत् प्रीतिरकाङ्ग तत्प्रियजनेष्वात्यन्तिकी तेन मे
गोपेन्द्रात्मजजीवनप्रणयिनी श्रीराधिका तुष्यतु ॥ ११५॥
रहो दास्यं तस्याः किमपि वृषभानोर्व्रजवर्-
यसः पुत्र्याः पूर्णप्रणयरसमूर्तेर्यदि लभे ।
तदा नः किं धर्मैः किमु सुरगणैः किं च विधिना
किमीशेन श्यामप्रियमिलनयत्नैरपि च किम् ॥ ११६॥
चन्द्रास्ये हरिणाक्षि देवि सुनसे शोणाधरे सुस्मिते
चिल्लक्ष्मीभुजवल्लि कम्बुरुचिरग्रीवे गिरीन्द्रस्तनि ।
भज्यन्मध्यबृहन्नितम्बकदलीखण्डोरुपादाम्बुज
प्रोन्मीलन्नखचन्द्रमण्डलि कदा राधे मयाराध्यसे ॥ ११७॥
राधापादसरोजभक्तिमचलामुद्वीक्ष्य निष्कैतवां
प्रीतः स्वं भजतोऽपि निर्भरमहाप्रेमाधिकं सर्वशः ।
आलिङ्गत्यथ चुम्बति स्ववदनात् ताम्बुलमास्येऽर्पयेत्
कण्ठे स्वां वनमालिकामपि मम न्यस्येत् कदा मोहनः ॥ ११८ ॥
लावण्यं परमाद्भुतं रतिकलाचातुर्यमत्यद्भुतं
कान्तिः कापि महाद्भुता वरतनोर्लीलागतिश्चाद्भुता ।
दृग्भङ्गी पुनरद्भुताद्भुततमा यस्याः स्मितं चाद्भुतं
सा राधाद्भुतमूर्तिरद्भुतरसं दास्यं कदा दास्यति ॥ ११९ ॥
भ्रमद्भ्रूकुटिसुन्दरं स्फुरितचारुबिम्बाधरं
ग्रहे मधुरहुङ्कृतं प्रणयकेलिकोपाकुलम् ।
महारसिकमौलिना सभयकौतुकं वीक्षितं
स्मरामि तव राधिके रतिकलासुखं श्रीमुखम् ॥ १२०॥
उन्मीलन्मुकुटच्छटापरिलसद्दिक्चक्रवालं स्फुरत्
केयूराङ्गदहारकङ्कणघटानिर्धूतरत्नच्छवि ।
श्रोणीमण्डलकिङ्किणीकलरवं मञ्जीरमञ्जुध्वनि
श्रीमत्पादसरोरुहं भज मनो राधाभिधानं महः ॥ १२१॥
श्यामामण्डलमौलिमण्डनमणिः श्यामानुरागस्फुरद्
रोमोद्भेदविभाविताकृतिरहो काश्मीरगौरच्छविः ।
सातीवोन्मदकामकेलितरला मां पातु मन्दस्मिता
मन्दारद्रुमकुञ्जमन्दिरगता गोविन्दपट्टेश्वरी ॥ १२२॥
उपास्यचरणाम्बुजे व्रजभृतां किशोरीगणैर्-
महद्भिरपि पुरुषैरपरिभाव्यभावोत्सवे ।
अगाधरसधामणि स्वपादपद्मसेवाविधौ
विधेहि मधुरोज्ज्वलामिव कृतिं ममाधिश्वरि ॥ १२३॥
आनम्राननचन्द्रमीरितदृगापाङ्गच्छटामन्थरं
किञ्चिद् दर्शिशिरोऽवगुण्ठनपटं लीलाविलासावधिम् ।



From http://sanskritdocuments.org

उन्नीयालकमञ्जरीः कररुहैरालक्ष्य सन्नागर
स्याङ्गेऽङ्गं तव राधिके सचकितालोकं कदा लोकये ॥ १२४॥
राकाचन्द्रो वराको यदनुपमरसानन्दकन्दानन्देन्दोस्-
तत्तादृक्चन्द्रिकाया अपि किमपि कणामात्र कस्याणुतोऽपि ।
यस्याः शोणाधरश्रीविधृतन्
अवसुधामाधुरीसारसिन्धुः
सा राधा कामबाधाविधुरमधुपतिप्राणदा प्रीयतां नः ॥ १२५॥
राकानेकविचित्रचन्द्र उदितः प्रेमामृतज्योतिषां
वीचीभिः परिपूरयेद् अगणितब्रह्माण्डकोटिं यदि ।
वृन्दारण्यनिकुञ्जसीमणि तदाभासः परं लक्ष्यसे
भावेनैव यदा तदैव तुलये राधे तव श्रीमुखम् ॥ १२६॥
कालिन्दीकूलकल्पद्रुमतल
निलयप्रोल्लसत्केलिकन्दा
वृन्दाटव्यां सदैव प्रकटतररहोवल्लवीभावभव्या ।
भक्तानां हृत्सरोजे मधुरर्-
अससुधास्यन्दिपादारविन्दा
सान्द्रानन्दाकृतिर्नः स्फुरतु नवनवप्रेमलक्ष्मीरमन्दा ॥ १२७॥
शुद्धप्रेमैकलीलानिधिरहह महातङ्कमङ्कस्थिते च
प्रेष्ठे बिभ्रत्यदभ्रस्फुरद
तुलकृपास्नेहमाधुर्यमूर्तिः ।
प्राणालीकोटिनीराजितपदसुषमामाधुरी माधवेन
श्रीराधा मामगाधामृतरसभरिते कर्हि दास्येऽभिषिञ्चेत् ॥ १२८॥
वृन्दारण्यनिकुञ्जसीमसु सदा स्वानङ्गरङ्गोत्सवैर्-
माद्यन्त्यद्भुतमाधवाधरसुधामाध्वीकसंवादनैः ।
गोविन्दप्रियवर्गदुर्गमसखीवृन्दैरनालक्षिता
दास्यं दास्यति मे कदा नु कृपया वृन्दावनाधीश्वरी ॥ १२९॥
मल्लीदामनिबद्धचारुकवरं सिन्दूररेखोल्लसत्
सीमन्तं नवरत्नचित्रतिलकं गण्डोल्लसत्कुण्डलम् ।
निष्कग्रीवमुदारहारमरुणं बिभ्रद्दुकूलं नवं
विद्युत्कोटिनिभं स्मरोत्सवमयं राधाख्यमीक्षे महः ॥ १३०॥
प्रेमोल्लासैकसीमा परमरसचमत्कारवैचित्र्यसीमा
सौन्दर्यसीमा किमपि नववयोरूपलावण्यसीमा ।
लीलामाधुर्यसीमा निजजनपरमौदार्यवात्सल्यसीमा
सा राधा सौख्यसीमा जयति रतिकलाकेलिमाधुर्यसीमा ॥ १३१॥
यस्यास्तत्सुकुमारसुन्दरपदोन्मीलन्नखेन्दुच्छटा
लावण्यैकलवोपजीविसकलश्यामामणिमण्डलम् ।



From http://sanskritdocuments.org

शुद्धप्रेमविलासमूर्तिरधिकोन्मीलन्महामाधुरी
धारासारधुरीणकेलिविभवा सा राधिका मे गतिः ॥ १३२॥
कलिन्दगिरिनन्दिनीसलिलबिन्दुसन्दोहभृन्
मृदून्नतिरतिश्रमं मिथुनमद्भुतक्रीडया ।
अमन्दरसतुन्दिलं भ्रमरवृन्दवृन्दाटवी
निकुञ्जवरमन्दिरे किमपि सुन्दरं नन्दति ॥ १३३॥
व्याकोशेन्दीवरविकसितामन्दहेमारविन्दं
श्रीमन्निस्यन्दनरतिरसान्दोलकन्दर्पकेलि ।
वृन्दारण्ये नवरससुधास्यन्दिपादारविन्दं
ज्योतिर्द्वन्द्वं किमपि परमानन्दकन्दं चकास्ति ॥ १३४॥
ताम्बूलं क्वचिद् अर्पयामि चरणौ संवाहयामि क्वचिन्
मालाद्यैः परिमण्डये क्वचिद् अहो संवीजयामि क्वचित् ।
कर्पूरादिसुवासितं क्व च पुनः सुस्वादु चाम्भोऽमृतं
पायाम्येव गृहे कदा खलु भजे श्रीराधिकामाधवौ ॥ १३५॥
प्रत्यङ्गोच्छलदुज्ज्वलामृतरसप्रेमैकपूर्णाम्बुधिर्-
लावण्यैकसुधानिधिः पुरुकृपावात्सल्यसाराम्बुधिः ।
तारुण्यप्रथमप्रवेशविलसन्माधुर्यसाम्राज्यभूर्-
गुप्तः कोऽपि महानिधिर्विजयते राधारसैकावधिः ॥ १३६॥
यस्याः स्फूर्जत्पदनख
मणिज्योतिरेकच्छटायाः
सान्द्रप्रेमामृतरसमहासिन्धुकोटिर्विलासः ।
सा चेद् राधा रचयति कृपादृष्टिपातं कदाचिन्
मुक्तिस्तुच्छीभवति बहुशः प्राकृताप्राकृतश्रीः ॥ १३७॥
कदा वृन्दारण्ये मधुरमधुरानन्दरसदे
प्रियेश्वर्याः केलिभवननवकुञ्जानि मृगये ।
कदा श्रीराधायाः पदकमलमाध्वीकलहरी
परीवाहैश्चेतो मधुकरमधीरं मदयिता ॥ १३८॥
राधाकेलिनिकुञ्जवीथिषु चरन् राधाभिधामुच्चरन्
राधाया अनुरूपमेव परमं धर्मं रासेनाचरन् ।
राधायाश्चरणाम्बुजं परिचरन् नानोपचारैर्मुदा
कर्हि स्यां श्रुतिशेखरोपरि चरन्न् आश्चर्यचर्यां चरन् ॥ १३९॥
यातायातशतेन सङ्गमितयोरन्योन्यवक्त्रोल्लसच्
चन्द्रालोकनसम्प्रभूतबहुलानङ्गाम्बुधिक्सोभयोः ।
अन्तःकुञ्जकुटीरतल्पग
तयोर्दिव्याद्भुतक्रीडयो
राधामाधवयोः कदा नु शृणुयात् मञ्जीरकाञ्चीध्वनिम् ॥ १४०॥



From http://sanskritdocuments.org

अहो भुवनमोहनं मधुरमाधवीमण्डपे
मधूत्सवसमुत्सकं किमपि नीलपीतच्छवि ।
विदग्धमिथुनं मिथोदृढतरानुरागोल्लसन्
मदं मदयते कदा चिरतरं मदीयं मनः ॥ १४१॥
राधानामसुधारसं रसयितुं जिह्वास्तु मे विह्वला
पादौ तत्पदकाङ्क्षितासु चरतां वृन्दाटवीवीथिषु ।
तत्कर्मैव करः करोतु हृदयं तस्याः पदं ध्यायतां
तद्भावोत्सवतः परं भवतु मे तत्प्राणनाथे रतिः ॥ १४२॥
मन्दीकृत्य मुकुन्दसुन्दरपदद्वन्द्वारविन्दामल
प्रेमानन्दममन्दमिन्दुतिलकाद्युन्मादकन्दं परम् ।
राधाकेलिकथारसाम्बुधिचलद्वीचिभिरान्दोलितं
वृन्दारण्यनिकुञ्जमन्दिरवरालिन्दे मनो नन्दतु ॥ १४३॥
राधानामैव कार्यं ह्यनुदिनमिलितं साधनाधीशकोटिस्-
त्याज्या नीराज्य राधापदकमलसुधां सत्पुमर्थाग्रकोटिः ।
राधापादाब्जलीलाभुवि जयति सदाऽमन्दमन्दारकोटिः
श्रीराधाकिअयोरङ्घुता सिद्धिकोटिः ॥ १४४॥
मिथोभङ्गीकोटिप्रवहदनुरागामृतरसो
त्तरङ्गद्भ्रूभङ्गक्षुभितबहिरभ्यन्तरमहो ।
मदाघूर्णन्नेत्रं रचयति विचित्रं रतिकला
विलासं तत्कुञ्जे जयति नवकैशोरमिथुनम् ॥ १४५॥
काचिद् वृन्दावननवलतामन्दिरे नन्दसूनोर्-
दृप्यद्दोष्कन्दलदृढप
रीरम्भनिस्पन्दगात्री ।
दिव्यानन्ताद्भुतरसकलाः कपयन्त्याविरास्ते
सान्द्रानन्दामृतरसघनप्रेममूर्तिः किशोरी ॥ १४६॥
न जानीते लोकं न च निगमजातं कुलपर
स्परां वा नो जानात्यहह न सतां चापि चरितम् ।
रसं राधायामाभजति किल भावं व्रजमणौ
रहस्ये तद् यस्य स्थितिरपि न साधारणगतिः ॥ १४७॥
ब्रह्मानन्दैकवादाः कतिचन भगवद्वन्दनानन्दमत्ताः
केचिद् गोविन्दसख्याद्यनुपमपरमानन्दमन्ये स्वदन्ते ।
श्रीराधाकिङ्करीणां त्वखिलसुखचमत्कारसारैकसीमा
तत्पादाम्भोजराजन्नखमणिव्
इलसज्ज्योतिरेकच्छटापि ॥ १४८॥
न देवैर्ब्रह्माद्यैर्न खलु हरिभक्तैर्न सुहृदा
दिभिर्यद् वै राधामधुपतिरहस्यं सुविदितम् ।


From http://sanskritdocuments.org

तयोर्दासीभूत्वा तदुपचितकेलीरसमये
दुरन्ताः प्रत्याशा हरि हरि दृशोर्गोचरयितुम् ॥ १४९ ॥
त्वयि श्यामे नित्यप्रणयिनि विदग्धे रसनिधौ
प्रिये भूयो भूयः सुदृढमतिरागो भवतु मे ।
इति प्रेष्ठेनोक्ता रमण मम चित्ते तव वचो
वदन्तीति स्मेरा मम मनसि राधा विलसतु ॥ १५० ॥
सदानन्दं वृन्दावननवलतामन्दिरवरेष्व्
अमन्दैः कन्दर्पोन्मदरतिकलाकौतुकरसम् ।
किशोरं तज्ज्योतिर्युगलमतिघोरं मम भवं
ज्वलज्ज्वालं शीतैः स्वपदमकरन्दैः शमयतु ॥ १५१ ॥
उन्मीलन्नवमल्लिदामविलसद्धम्मिल्लभावे बृहच्
छ्रोणीमण्डलमेखलाकलरवे शिञ्जत्सुमञ्जीरिणि ।
केयूराङ्गदकङ्कणावलिलसद्दोर्वल्लिदीप्तिच्छटे
हेमाम्भोरुहकुट्मलस्तनि कदा राधे दृशा पीयसे ॥ १५२ ॥
अमर्यादोन्मीलत्सुरतरसपीयूषजलधेस्-
तरङ्गैरुत्तङ्गैरिव किमपि दोलायिततनुः ।
स्फुरन्ती प्रेयोऽङ्के स्फुटकनकपङ्केरुहमुखी
सखीनां नो राधे नयनसुखमाधास्यसि कदा ॥ १५३ ॥
क्षरन्तीव प्रत्यक्षरमनुपमप्रेमजलधिं
सुधाधारावृष्टीरिव विदधती श्रोत्रपुटयोः ।
रसार्द्रा सन्मृद्वी परमसुखदा शीतलतरा
भवित्री किं राधे तव सह मया कापि सुकथा ॥ १५४ ॥
अनुल्लिख्यानन्तान् अपि सदपराधान् मधुपतिर्-
महाप्रेमाविष्टस्तव परमदेयं विमृशति ।
तवैकं श्रीराधे गृणत इह नामामृतरसं
महिम्नः कः सीमां स्पृशतु तव दास्यैकमनसाम् ॥ १५५ ॥
लुलितनवलवङ्गोदारकर्पूरपूरं
प्रियतममुखचन्द्रोद्गीर्णताम्बूलखण्डम् ।
घनपुलककपोला स्वादयन्ती मदास्येऽ
र्पयतु किमपि दासीवत्सला कर्हि राधा ॥ १५६ ॥
सौन्दर्यामृतराशिरद्भुतमहालावण्यलीलाकला
कालिन्दीवरवीचिडम्बरपरिस्फूर्जत्कटाक्षच्छविः ।
सा कापि स्मरकेलिकोमलकलावैचित्र्यकोटिस्फुरत्
प्रेमानन्दघनाकृतिर्दिशतु मे दास्यं किशोरीमणिः ॥ १५७ ॥
दुकूलमतिकोमलं कलयद् एव कौसुम्भकं
निबद्धनवमल्लिकाललितमाल्यधम्मिल्लकम् ।


From http://sanskritdocuments.org

बृहत्कटितटस्फुरन्मुखरमेखलालङ्कृतं
कदा नु कलयामि तत्कनकचम्पकाभं महः ॥१५८॥
कदा रासे प्रेमोन्मदरसविलासेऽद्भुतमये
दृशोर्मध्ये भ्राजन्मधुपतिसखीवृन्दवलये ।
मुदान्तः कान्तेन स्वरचितमहालास्यकलया
निषेवे नृत्यन्तीं व्यनजवरताम्बूलशकलैः ॥१५९॥
प्रसृमरपटवासे प्रेमसीमाविकासे
मधुरमधुरहासे दिव्यभूषाविलासे ।
पुलकितदयितांसे संवलद्बाहुपाशे
तदतिललितरासे कर्हि राधामुपासे ॥१६०॥
यदि कनकसरोजं कोटिचन्द्रांशुपूर्णं
नवनवमकरन्दस्यन्दिसौन्दर्यधाम ।
भवति लसितचञ्चत्खञ्जनद्वन्द्वमास्यं
तद् अपि मधुरहास्यं दत्तदास्यं न तस्याः ॥१६१॥
सुधाकरमुधाकरं प्रतिपदस्फुरन्माधुरी
धुरीणनवचन्द्रिकाजलधितुन्दिलं राधिके ।
अतृप्तहरिलोचनद्वयचकोरपेयं कदा
रसाम्बुधिसमुन्नतं वदनचन्द्रमीक्षे तव ॥१६२॥
अङ्गप्रत्यङ्गरिङ्गन्मधुरत्
अरमहाकीर्तिपीयूषसिन्धोर्-
इन्दोः कोटिर्विनिन्दद् वदनम्
अतिमदालोलनेत्रं दधत्याः ।
राधायाः सौकुमार्याद्भुतललिततनोः केलिकल्लोलिनीनाम्
आनन्दस्यन्दिनीनां प्रणयरसमयान् किं विगाहे प्रवाहान् ॥१६३॥
मत्कण्ठे किं नखरशिखया दैत्यराजोऽस्मि नाहं
मैवं पीडां कुरु कुचतटे पुतना नाहमस्मि ।
इत्थं कीरैरनुकृतवचः प्रेयसा सङ्गतायाः
प्रातः श्रोष्ये तव सखि कदा केलिकुञ्जं मृजन्ती ॥१६४॥
जाग्रत्स्वप्नसुषुप्तिषु स्फुरतु मे राधापदाब्जच्छटा
वैकुण्ठे नरकेऽथवा मम गतिर्नान्यास्तु राधां विना ।
राधाकेलिकथा सुधाम्बुधिमहावीचिभिरान्दोलितं
कालिन्दीतटकुञ्जमन्दिरवरालिन्दे मनो विन्दतु ॥१६५॥
अलिन्दे कालिन्दीतटनवलतामन्दिरगते
रतामर्दोद्भुतश्रमजलभरापूर्णवपुषोः ।
सुखस्पर्शेनामीलितनयनयोः शीतमतुलं
कदा कुर्यां संवीजनमहह राधामुरभिदोः ॥१६६॥


From http://sanskritdocuments.org

क्षणं मधुरगानतः क्षणममन्दहिन्दोलतः
क्षणं कुसुमवायुतः सुरतकेलिशिल्पैः क्षणम् ।
अहो मधुरसद्रसप्रणयकेलिवृन्दावने
विदग्धवरनागरई रसिकशेखरौ खेलतः ॥ १६७॥
अद्य श्यामकिशोरमौलिरहह प्राप्तो रजन्या मुखे
नीत्वा तां करयोः प्रगृह्य सहसा नीपाटवीं प्राविशत् ।
श्रोष्ये तल्पमिलन्महारतिभरे प्राप्तेऽपि शीत्कारितं
तद्वीचिसुखतर्जनं किमु हरे
: स्वश्रोत्ररन्ध्रश्रितम् ॥ १६८॥
श्रीमद्राधे त्वमथ मधुरं श्रीयशोदाकुमारे
प्राप्ते कैशोरकमतिरसाद् वल्गसे साधुयोगम् ।
इत्थं बाले महसि कथया नित्यलीलावयःश्री
जातावेशा प्रकटसहजा किं नु दृश्या किशोरी ॥ १६९॥
एकं काञ्चनचम्पकच्छवि परं नीलाम्बुदश्यामलं
कन्दर्पोत्तरलं तथैकमपरं नैवानुकूलं बहिः ।
किं चैकं बहुमानभङ्गि रसवच्चाटूनि कुर्वत् परं
पश्य क्रीडति कुञ्जसीम्नि तद् अहो द्वन्द्वं महामोहनम् ॥ १७०॥
विचित्ररतिविक्रमं दधदनुक्रमाद् आकुलं
महामदनवेगतो निभृतमञ्जुकुञ्जोदरे ।
अहो विनिमयन् नवं किमपि नीलपीतं पटं
मिथो मिलितमद्भुतं जयति पीतनीलं महः ॥ १७१॥
करे कमलमद्भुतं भ्रमयतोर्मिथोत्सर्पित
स्फुरत्पुलकदोर्लतायुगलयोः स्मरोन्मत्तयोः ।
सहासरसपेशलं मदकरीन्द्रभङ्गीशतैर्-
गतिं रसिकयोर्द्वयोः स्मरत चारुवृन्दावने ॥ १७२॥
खेलन्मुग्धाक्षिमीनस्फुरदध्
अरमणीविद्रुमश्रोणिभार
द्वीपायामोत्तरङ्गस्मरकलभकटाटोपवक्षोरुहायाः ।
गम्भीरावर्तनाभेर्बहुलहरिमहाप्रेमपीयूषसिन्धोः
श्रीराधायाः पदाम्भोरुहपरिचरेण योग्यतामेव गेषे ॥ १७३॥
विच्छेदाभासमात्राद् अहह निमिषतो गात्रविस्रंसनादौ
दीप्यत् कल्पाग्निकोटिज्वलितमिव भवेद् बाह्यमभ्यन्तरं च ।
गाढस्नेहानुबन्धग्रथितमिव ययोरद्भुतप्रेममूर्त्योः
श्रीराधामाधवाख्यां परमिह मधुरं तद्द्वयं धाम जाने ॥ १७४॥
कदा रत्युन्मुक्तं कचभरमहं संयमयिता
कदा वा संधास्ये त्रुटितनवमुक्तावलिमपि ।


From http://sanskritdocuments.org

कदा वा कस्तूर्यास्तिलकमपि भूयो रचयिता
निकुञ्जान्तर्वृत्ते नवरतिरणे यौवतमणेः ॥ १७५॥
किं ब्रूमोऽन्यत्र कुण्ठीकृतक जनपदे धाम्न्यपि श्रीविकुण्ठे
राधामाधुर्यवेत्ता मधुपतिरथ तन्माधुरीं वेत्ति राधा ।
वृन्दारण्यस्थलीयं परमरससुधामाधुरीणां धुरीणा
तद्द्वन्द्वं स्वादनीयं सकलमपि ददौ राधिकाकिङ्करीणाम् ॥ १७६॥
लसद्वदनपङ्कजा नवगभीरनाभिभ्रमा
नितम्बपुलिनोल्लसन्मुखरकाञ्चिकादम्बिनी ।
विशुद्धरसवाहिनी रसिकसिन्धुसङ्गोन्मदा
सदा सुरतरङ्गिनी जयति कापि वृन्दावने ॥ १७७॥
अनङ्गनवरङ्गिणी रसतरङ्गिणी सङ्गता
दधत् सुखसुधामये स्वतनुनीरधौ राधिका ।
अहो मधुपकाकलीमधुरमाधवीमण्डपे
स्मरक्षुभितमेधते सुरतसीधुमत्तं महः ॥ १७८॥
रोमालीमिहिरात्मजा सुललिते बन्धूकबन्धुप्रभा
सर्वाङ्गे स्फुटचम्पकच्छविरहो नाभीसरःशोभना ।
वक्षोजस्तवका लसद्भुजलता शिञ्जापतज्झङ्कृतिः
श्रीराधा हरते मनो मधुपतेरन्येव वृन्दाटवी ॥ १७९॥
राधामाधवयोर्विचित्रसुरतारम्भे निकुञ्जोदरे
स्रस्तप्रस्तरसङ्गतैर्वपुरलङ्कुर्वेऽङ्गरागैः कदा ।
तत्रैव त्रुटिताः स्रजो निपतिताः सन्धाय भूयः कदा
कण्ठे धारयितास्मि मार्जनकृते प्रातः प्रविष्टास्म्यहम् ॥ १८०॥
श्लोकान् प्रेष्ठयशोऽङ्कितान् गृहशुकान् अध्यापयेत् कर्हिचिद्
गुञ्जामञ्जुलहार बर्हमुकुटं निर्माति काले क्वचित् ।
आलिख्य प्रियमूर्तिमाकुलकुचौ सङ्घट्टयेद् वा कदाप्य्
एवं व्यापृतिभिर्दिनं नयति मे राधा प्रियस्वामिनी ॥ १८१॥
प्रेयःसङ्गसुधासदानुभविनी भूयो भवद्भाविनी
लीलापञ्चमरागिणी रतिकलाभङ्गीशतोद्भाविनी ।
कारुण्याद्द्रवभाविनी कटितटे काञ्चीकलाराविणी
श्रीराधैव गतिर्ममास्तु पदयोः प्रेमामृतस्राविणी ॥ १८२॥
कोटीन्दुच्छविहासिनी नवसुधासम्भारसम्भाषिणी
वक्षोजद्वितयेन हेमकलसश्रीगर्वनिर्वासिनी ।
चित्रग्रामनिवासिनी नवनवप्रेमोत्सवोल्लासिनी
वृन्दारण्यविलासिनी किमु रहो भूयान् ममोल्लासिनी ॥ १८३॥
कदा गोविन्दाराधनगलितताम्बूलशवलं
मुदा स्वादं स्वादं पुलकिततनुर्मे प्रियसखी ।


From http://sanskritdocuments.org

दुकूलेनोन्मीलन्नवकमलकिञ्जल्करुचिना
निवीताङ्गी सङ्गीतकनिजकलाः शिक्षयति माम् ॥१८४॥
लसद्दशनमौक्तिकप्रव
रकान्तिपूरस्फुरन्
मनोज्ञनवपल्लवाधरमणिच्छटासुन्दरम् ।
चरन्मकरकुण्डलं चकितचारुनेत्राञ्चलं
स्मरामि तव राधिके वदनमण्डलं निर्मलम् ॥१८५॥
चलत्कुटिलकुन्तलं तिलकशोभिभालस्थलं
तिलप्रसवनासिकापुटविराजिमुक्ताफलम् ।
कलङ्करहितामृतच्छविसमुज्ज्वलं राधिके
तवातिरतिपेशलं वदनमण्डलं भावये ॥१८६॥
पूर्णप्रेमामृतरससमुल्लाससौभाग्यसारं
कुञ्जे कुञ्जे नवरतिकलाकौतुकेनात्तकेलि ।
उत्पुल्लेन्दीवरकनकयोः कान्तिचौरं किशोरं
ज्योतिर्द्वन्द्वं किमपि परमानन्दकन्दं चकास्ति ॥१८७॥
ययोन्मीलत्केलीविलसितकटाक्षैककलया
कृतो वन्दी वृन्दाविपिनकलभेन्द्रो मदकलः ।
जडीभूतः क्रीडामृग इव यदाज्ञालवकृते
कृती नः सा राधा शिथिलयतु साधारणगतिम् ॥१८८॥
श्रीगोपेन्द्रकुमारमोहनमहाविद्ये स्फुरन्माधुरी
सारस्फाररसाम्बुराशिसहजप्रस्यन्दिनेत्राञ्चले ।
कारुण्यार्द्रकटाक्षभङ्गिमधुरस्मेराननाम्भोरुहे
हा हा स्वामिनि राधिके मयि कृपादृष्टिं मनाङ् निक्षिप ॥१८९॥
ओष्ठप्रान्तोच्छलितदयितोद्गीर्णताम्बूलरागा
रागानुच्चैर्निजरचितया चित्रभङ्ग्योन्नयन्ती ।
तिर्यग्ग्रीवा रुचिररुचिरोदञ्चदाकुञ्चितभ्रूः
प्रेयःपार्श्वे विपुलपुलकैर्मण्डिता भाति राधा ॥१९०॥
किं रे धूर्तप्रवर निकटं यासि नः प्राणसख्या
नूनं बाला कुचतटकरस्पर्शमात्राद् विमुह्येत् ।
इत्थं राधे पथि पथि रसान् नागरं तेऽनुलग्नं
क्षिप्त्वा भङ्ग्या हृदयमुभयोः कर्हि संमोहयिष्ये ॥१९१॥
कदा वा राधायाः पदकमलमायोज्य हृदये
दयेशं निःशेषं नियतमिह जह्यामुपविधिम् ।
कदा वा गोविन्दः सकलसुखदः प्रेमकरणाद्
अनन्ये धन्ये वै स्वयमुपनयेत स्मरकलाम् ॥१९२॥
कदा वा प्रोद्दामस्मरसमरसंरम्भरभस


From http://sanskritdocuments.org

प्ररूढस्वेदाम्भःप्लुतलुलितचित्राखिलतनू ।
गतौ कुञ्जद्वारे सुखमरुति संवीज्य परया
मुदाहं श्रीराधारसिकतिलकौ स्यां सुकृतिनी ॥ १९३॥
मिथःप्रेमावेशाद् घनपुलकदोर्वल्लिरचित
प्रगाढाश्लेषेणोत्सवरसभरोन्मीलितदृशौ ।
निकुञ्जक्लृप्ते वै नवकुसुमतल्पेऽभिशयितौ
कदा पत्संवाहादिभिरहमधीशौ न सुखये ॥ १९४॥
मदारुणविलोचनं कनकदर्पकामोचनं
महाप्रणयमाधुरीरसविलासनित्योत्सुकम् ।
लसन्नववयःश्रिया ललितभङ्गिलीलामयं
हृदा तद् अहमुद्वहे किमपि हेमगौरं महः ॥ १९५॥
मदाघूर्णन्नेत्रं नवरतिरसावेशविवशो
ल्लसद्गात्रं प्राणप्रणयपरिपाट्यां परतरम् ।
मिथोगाढाश्लेषाद् वलयमिव जातं मरकत
द्रुतस्वर्णच्छायं स्फुरतु मिथुनं तन् मम हृदि ॥ १९६॥
परस्परं प्रेमरसे निमग्नम्
अशेषसम्मोहनरूपकेलि ।
वृन्दावनान्तर्नवकुञ्जगेहे
तन्नीलपीतं मिथुनं चकास्ति ॥ १९७॥
आशास्य दास्यं वृषभानुकुमारिकायास्-
तीरे समध्यास्य च भानुजायाः ।
कदा नु वृन्दावनकुञ्जवीथिष्व्
अहं नु राधे ह्यतिथिर्भवेयम् ॥ १९८॥
कालिन्दीतटकुञ्जे पुञ्जीभूतं रसामृतं किमपि ।
अद्भुतकेलिनिधानं निरवधि राधाभिधानमुल्लसति ॥ १९९॥
प्रीतिरेव मूर्तिमति, रससिन्धोः सारसम्पद् इव विमला ।
वैदग्धीनां हृदयं काचन वृन्दावनाधिकारिणी जयति ॥ २००॥
रसघनमोहनमूर्तिं, विचित्रकेलिमहोत्सवोल्लसितम् ।
राधाचरणविलोडितं, रुचिरशिखण्डं हरिं वन्दे ॥ २०१॥
कदा गायं गायं मधुरमधुरीत्या मधुभिदश्
चरित्राणि स्फारामृतरसविचित्राणि बहुशः ।
मृजन्ती तत्केलिभवनमभिरामं मलयज
च्छट् ?बहिः सिञ्चन्ती रसह्रदनिमग्नास्मि भविता ॥ २०२॥
उदञ्चद्रोमाञ्चप्रचयखचितां वेपथुमतीं
दधानां श्रीराधामतिमधुरलीलामयतनुम् ।
कदा वा कस्तूर्या किमपि रचयन्त्येव कुचयोर्-


From http://sanskritdocuments.org

विचित्रां पत्रालीमहमहह वीक्षे सुकृतिनी ॥ २०३॥
क्षणं शीत्कुर्वाणा क्षणमथ महावेपथुमती
क्षणं श्याम श्यामेत्यमुमभिलपन्ती पुलकिता ।
महाप्रेमा कापि प्रमदमदनोद्दामरसदा
सदानन्दा मूर्तिर्जयति वृषभानोः कुलमणिः ॥ २०४॥
क्षणं शीत्कुर्वाणा क्षणमथ महावेपथुमती
क्षणं श्याम श्यामेत्यमुमभिलपन्ती पुलकिता ।
महाप्रेमा कापि प्रमदमदनोद्दामरसदा
सदानन्दा मूर्तिर्जयति वृषभानोः कुलमणिः ॥ २०५॥
कामं तुलिकया करेण हरिणा यालक्तकैरङ्किता
नानाकेलिविदग्धगोपरमणीवृन्दस्तथा वन्दिता ।
या सङ्गुप्ततया तथोपनिषदां हृद्येन विद्योतते
सा राधाचरणद्वयी मम गतिर्लास्यैकलीलामयी ॥ २०६॥
सान्द्रप्रेमरसौघवर्षिणि नवोन्मीलन्महामाधुरी
साम्राज्यैकधुरीणकेलिविभवत्कारुण्यकल्लोलिनि ।
श्रीवृन्दावनचन्द्रचित्तहरिणीबन्धस्फुरद्वागुरे
श्रीराधे नवकुञ्जनागरि तव क्रीतास्मि दास्योत्सवः ॥ २०७॥
स्वेदापुरः कुसुमचयनैर्दूरतः कण्टकाङ्को
वक्षोजेऽस्यास्तिलकविलयो हन्त घर्माम्भसैव ।
ओष्ठः सख्या हिमपवनतः सव्रणो राधिके ते
क्रूरास्वेदं स्वघटितमहो गोपये प्रेष्ठसङ्गम् ॥ २०८॥
पातं पातं पदकमलयोः कृष्णभृङ्गेण तस्याः
स्मेरास्येन्दोर्मुकुलितकुचद्वन्द्वहेमारविन्दम् ।
पीत्वा वक्त्राम्बुजमतिरसन् नूनमन्तः प्रवेष्टुम्
अत्यावेशान् नखरशिखरा पात्यमानं किमीक्षे ॥ २०९॥
अहो तेऽमी कुञ्जास्तदनुपमरासस्थलमिदं
गिरिद्रोणी सैव स्फुरति रतिरङ्गे प्रणयिनी ।
न वीक्षे श्रीराधां हरि हरि कुतोऽपीति शतधा
विदीर्येत प्राणेश्वरि मम कदा हन्त हृदयम् ॥ २१०॥
इहैवाभूत् कुञ्जे नवरतिकलामोहनतनोर्-
अहो अत्रानृत्यद् दयितसहिता सा रसनिधिः ।
इति स्मारं स्मारं तव चरितपीयूषलहरीं
कदा स्यां श्रीराधे चकित इह वृन्दावनभुवि ॥ २११॥
श्रीमद्बिम्बाधरे ते स्फुरति नवसुधामाधुरीसिन्धुकोटिर्-
नेत्रान्तस्ते विकीर्णाद्भुतकुसुमधनुश्चण्डसत्काण्डकोटिः ।
श्रीवक्षोजे तवातिप्रमदरसकलासारसर्वस्वकोटिः


From http://sanskritdocuments.org

श्रीराधे त्वत्पदाब्जात् स्रवति निरवधिप्रेमपीयूषकोटिः ॥ २१२॥
सान्द्रानन्दोन्मदरसघनप्रेमपीयूषमूर्तेः
श्रीराधाया अथ मधुपतेः सुप्तयोः कुञ्जतल्पे ।
कुर्वाणाहं मृदुमृदुपदाम्भोजसंवाहनानि
शय्यान्ते किं किमपि पतिता प्राप्ततन्द्रा प्राप्ततन्द्रा भवेयम् ॥ २१३॥
राधापादारविन्दोच्छलितनवरसप्रेमपीयूषपुञ्जे
कालिन्दीकुलकुञ्जे हृदि कलितमहोदारमाधुर्यभावः ।
श्रीवृन्दारण्यवीथीललितरतिकलानागरीं तां गरीयो
गम्भीरैकानुरागां मनसि परिचरन विस्मृतान्यः कदा स्याम् ॥ २१४॥
अदृष्ट्वा राधाङ्के निमिषमपि तं नागरमणिं
तया वा खेलन्तं ललितललितानङ्गकलया ।
कदाहं दुःखाब्दौ सपदि पतिता मूर्च्छितवती
न तामाश्वास्यार्तां सुचिरमनुशोचे निजदशाम् ॥ २१५॥
भूयो भूयः कमलनयने किं मुधा वार्यतेऽसौ
वाङ्मात्रेऽपि त्वानुगमनं न त्य्जत्येव धूर्तः ।
किञ्चिद् राधे कल कुचतटीप्रान्तमस्य म्रदीयश्
चक्षुर्द्वारा तमनुपतितं चूर्णतामेतु चेतः ॥ २१६॥
किं वा नस्तैः सुशास्त्रैः किमथ तदुदितैर्वर्त्मभिः सद्गृहीतैर्-
यत्रास्ति प्रेममूर्तेर्नहि महिमसुधा नापि भावस्तदीयः ।
किं वा वैकुण्ठलक्ष्म्याप्यहह परमया यत्र मे नास्ति राधा
किन्त्वाशाप्यस्तु वृन्दावनभुवि मधुरा कोटिजन्मान्तरेऽपि ॥ २१७॥
श्याम श्यामेत्यनुपमरसापूर्णवर्णैर्जपन्ती
स्थित्वा स्थित्वा मधुरमधुरोत्तारमुच्चारयन्ती ।
मुक्तास्थूलान् नयनगलितान् अश्रुबिन्दून वहन्ती
हृष्यद्रोमा प्रतिपदचमत्कुर्वती पातु राधा ॥ २१८॥
तादृङ्मूर्तिर्व्रजपतिसुतः पादयोर्मे पतित्वा
दन्ताग्रेणाथ धृततृणकं काकुवादान् ब्रवीति ।
नित्यं चानुव्रजति कुरुते सङ्गमायोद्यमं चे
त्युद्वेगं मे प्रणयिनि किमावेदयेयं न्यृाधे ॥ २१९॥
चलल्लीलागत्या क्वचिदनुचलद्धंसमिथुनं
क्वचित् केकिन्यग्रे कृतनटनचन्द्रक्यनुकृति ।
लताश्लिष्टं शाखिप्रवरमनुकुर्वत् क्वचिद् अहो
विदग्धद्वन्द्वं तद् रमत इह वृन्दावनभुवि ॥ २२०॥
व्याकोशेन्दीवरमथ रुचा हारि हेमारविन्दं
कालिन्दीयं सुरभिमनिलं शीतलं सेवमानम् ।
सान्द्रानन्दं नवनवरसं प्रोल्लसत्केलिवृन्दं


From http://sanskritdocuments.org

ज्योतिर्द्वन्द्वं मधुरमधुरं प्रेमकन्दं चकास्ति ॥ २२१॥
कदा मधुरसारिकाः स्वरसपद्यमध्यापयत्
प्रदाय करतालिकाः क्वचन नर्तयत् केकिनम् ।
क्वचित् कनकवल्लरीवृततमाललीलाधनं
विदग्धमिथुनं तदद्भुतमुदेति वृन्दावने ॥ २२२॥
पत्रालीं ललितां कपोलफलके नेत्राम्बुजे कज्जलं
रङ्गं बिम्बफलाधरे च कुचयोः काश्मीरजालेपनम् ।
श्रीराधे नवसङ्गमाय तरले पादाङ्गुलीपङ्क्तिषु
न्यस्यन्ती प्रणयाद् अलक्तककवलं पूर्णा कदा स्यामहम् ॥ २२३॥
श्रीगोवर्धन एक एव भवता पाणौ प्रयत्नाद् धृतः
श्रीराधातनुहेमशैलयुगले दृष्टेऽपि ते स्याद् भयम् ।
तद् गोपेन्द्रकुमार मा कुरु वृथा गर्वं परीहासतः
कर्ह्येवं वृषभानुनन्दिनि तव प्रेयांसमाभाषये ॥ २२४॥
अनङ्गजयमङ्गलध्वनितकिङ्किणीडिण्डिमः
स्तनादिवरताडनैर्नखरदन्तघातेर्युतः ।
अहो चतुरनागरीनवकिशोरयोर्मञ्जुले
निकुञ्जनिलयाजिरे रतिरणोत्सवो जृम्भते ॥ २२५॥
यूनोर्वीक्ष्य दरत्रपानटकलामादीक्षयन्ती दृशौ
वृण्वाना चकितेन सञ्चितमहारत्नस्तनं चाप्युरः ।
सा काचिद् वृषभानुवेश्मनि सखीमालासु बालावली
मौलिः खेलति विश्वमोहनमहासारूप्यमाचिन्वती ॥ २२६॥
ज्योतिःपुञ्जद्वयमिदमहो मण्डलाकारमस्या
वक्षस्युन्मादयति हृदयं किं फलत्यन्यदग्रे
भ्रूकोदण्डं नकृतघटनं सत्कटाक्षौघबाणैः
प्राणान् नह्यात् किमु परमतो भावि भूयो न जाने ॥ २२७॥
भोः श्रीदामन् सुबल वृषभ स्तोककृष्णार्जुनाद्याः
किं वो दृष्टं मम नु चकिता दृग्गता नैव कुञ्जे ।
काचिद् देवी सकलभुवनाप्लावि लावण्यपुरा
दूराद् एवाखिलमहरत प्रेयसो वस्तु सख्युः ॥ २२८॥
गता दूरे गावो दिनमपि तुरीयांशमभजद्
वयं यातुं क्षान्तास्तव च जननी वर्त्मनयना ।
अकस्मात् तूष्णीके सजलनयने दीनवदने
लुठत्यस्यां भूमौ त्वयि नहि वयं प्राणिनिषवः ॥ २२९॥
नासाग्रे नवमौक्तिकं सुरुचिरं स्वर्णोज्ज्वलं बिभ्रती
नानाभङ्गिरनङ्गरङ्गविलसल्लीलातरङ्गावली ।
राधे त्वं समलोभय व्रजमणिं रत्नच्छटामञ्जरी


From http://sanskritdocuments.org

चित्रोदञ्चितकञ्चुकस्थगितयोर्वक्षोजयोः शोभया ॥ २३० ॥
अप्रेक्षे कृतनिश्चयापि सुचिरं दृक्कोणतो वीक्षते
मौने दार्ढ्यमुपाश्रितापि निगदेत् तामेव याहीत्यहो ।
अस्पर्शे सुधृताशयापि करयोर्धृत्वा बहिर्यापयेद्
राधाया इति मानदुःस्थितिमहं प्रेक्षे हसन्ती कदा ॥ २३१ ॥
रसागाधे राधाहृदि सरसि हंसः करतले
लसद्वंशश्रोतस्यमृतगुणसङ्गः प्रतिपदम् ।
चलत्पिच्छोत्तंसः सुरचितवतंसः प्रमदया
स्फुरद्गुञ्जागुच्छः स हि रसिकमौलिर्मिलतु मे ॥ २३२ ॥
अकस्मात् कस्याश्चिन् नववसनमाकर्षति परां
मुरल्या धम्मिल्ले स्पृशति कुरुतेऽन्याकरधृतिम् ।
पतन् नित्यं राधापदकमलमूले व्रजपुरे
तद् इत्थं वीथीषु भ्रमति स महालम्पटमणिः ॥ २३३ ॥
एकस्या रतिचौर एव चकितं चान्यास्तनान्ते करं
कुर्यात् कर्षति वेणुनान्यसुदृशो धम्मिल्लमल्लीस्रजम् ।
धत्तेऽन्याभुजवल्लिमुत्पुलक्तिआं सङ्केतयत्यन्यया
राधायाः पदयोर्लुठत्यलममुं जाने महालम्पटम् ॥ २३४ ॥
प्रियांसे निक्षिप्तोत्पुलकभुजदण्डः क्वचिद् अपि
भ्रमन् वृन्दारण्ये मदकलकरीन्द्राद्भुतगतिः ।
निजां व्यञ्जन् अत्यद्भुतसुरतशिक्षां क्वचिद् अहो
रहःकुञ्जे गुञ्जध्वनितमधुपे क्रीडति हरिः ॥ २३५ ॥
दूरे स्पृष्ट्यादिवार्ता न कलयति मनाङ्नारदादीन् स्वभक्तान्
श्रीदामाद्यैः सुहृद्भिर्न मिलति च हरेत् स्नेहवृद्धिं स्वपित्रोः ।
किन्तु प्रेमैकसीमां मधुररससुधासिन्धुसारैरगाधां
श्रीराधामेव जानन् मधुपतिरनिशं कुञ्जवीथीमुपास्ते ॥ २३६ ॥
सुस्वादुसुरसतुन्दिलम्, इन्दीवरसुन्दरं किमपि ।
अधिवृन्दाटवि नन्दति, राधावक्षोजभूषणं ज्योतिः ॥ २३७ ॥
कान्तिः कापि परोज्ज्वला नवमिलच्छ्रीचन्द्रिकोद्भासिनी
रामात्यद्भुतवर्णकाञ्च्तरुचिर्नित्याधिकाङ्गच्छविः ।
लज्जानम्रतनुः स्मयेन मधुरा प्रीणाति केलिच्छटा
सन्मुक्ताफलचारुहारसुरुचिः स्वात्मार्पणेनाच्युतम् ॥ २३८ ॥
यन् नारदाजेशशुकैरगम्यं वृन्दावने वञ्जुलमञ्जुकुञ्जे ।
तत् कृष्णचेतोहरणैकविज्ञमत्रास्ति किञ्चित् परमं रहस्यम् ॥ २३९ ।
लक्ष्मीर्यस्य न गोचरीभवति यन् नापुः सखायः प्रभोः
सम्भाव्योऽपि विरिञ्चिनारदशिवस्वायम्भुवाद्यैर्न यः ।
यो वृन्दावननागरीपशुपतिस्त्रीभावलभ्यः कथं


From http://sanskritdocuments.org

राधामाधवयोर्ममास्तु स रहोदास्याधिकारोत्सवः ॥ २४०॥
उच्छिष्टामृतभाक् तवैव चरितं शृण्वंस्तवैव स्मरन्
पादाम्भोजरजस्तवैव विरचन् कुञ्जांस्तवैवालयान् ।
गायन् दिव्यगुणांस्तवैव रसदे पश्यंस्तवैवाकृतिं
श्रीराधे तनुवाङ्मनोभिरमलैः सोऽहं तवैवाश्रितः ॥ २४१॥
क्रीडन्मीनद्वयाक्ष्याः स्फुरदधरमणीर्विद्रुमशोणिभार
द्वीपायामान्तरालस्मरकलभकटाटोपवक्षोरुहायाः ।
गम्भीरावर्तनाभेर्वहलहरिमहाप्रेमपीयूषसिन्धोः
श्रीराधायाः पदाम्भोरुहपरिचरणे योग्यतामेव मृग्ये ॥ २४२॥
मालाग्रन्थनशिक्षया मृदुमृदुश्रीखण्डनिर्घर्षणा
देशेनाद्भुतमोदकादिविधिभिः कुञ्जातसंमार्जनैः ।
वृन्दारण्यरहःस्थलीषु विवशा प्रेमार्तिभारोद्गमात्
प्राणेशं परिचारकैः खलु कदा दास्या मयाधीश्वरी ॥ २४३॥
प्रेमाम्भोधिरसोल्लसत्तरुणिमारम्भेण गम्भीरदृग्
भेदं भङ्गिमृदुस्मितामृतनवज्योत्स्नाञ्चितश्रीमुखी ।
श्रीराधा सुखधामनि प्रविलसद्वृन्दाटवीसीमनि
प्रेयोऽङ्के रतिकौतुकानि कुरुते कन्दर्पलीलानिधिः ॥ २४४॥
शुद्धप्रेमविलासवैभवनिधिः कैशोरशोभानिधिः
वैदग्धीमधुराङ्गभङ्गिमनिधिर्लावण्यसम्पन्निधिः ।
श्रीराधा जयतान् महारसनिधिः कन्दर्पलीलानिधिः
सौन्दर्यैकसुधानिधिर्मधुपतेः सर्वस्वभूतो निधिः ॥ २४५॥
नीलेन्दीवरवृन्दकान्तिलहरीचौरं किशोरद्वयं
त्वय्येतत्कुचयोश्चकास्ति किमिदं रूपेण मे मोहनम् ।
तन् मामात्मसखीं कुरु द्वित्तरुणीयं नौ दृढं श्लिष्यति
स्वच्छायामभिवीक्ष मुह्यति हरौ राधास्मितं पातु नः ॥ २४६॥
सङ्गत्यापि महोत्सवेन मधुराकारां हृदि प्रेयसः
स्वच्छायामभिवीक्ष्य कौस्तुभमणौ सम्भूतशोका क्रुधा ।
उत्क्षिप्तप्रियपाणि तिष्ठ स्तनयेत्युक्त्वा गताया बहिः
सख्यै सास्र निवेदनानि किमहं श्रोष्यामि ते राधिके ॥ २४७॥
महामणिवरस्रजं कुसुमसञ्चयैरञ्चितं
स्फुरन्मरकतप्रभाग्रथितमोहितश्यामलम् ।
महारसमहीपतेरिव विचित्रसिद्धासनं
कदा नु तव राधिके कवरभारमालोकये ॥ २४८॥
मध्ये मध्ये कुसुमखचितं रत्नदाम्ना निबद्धं
मल्लीमाल्यैर्घनपरिमलैर्भूषितं लम्बमानैः ।
पश्चाद्राजन्मणिवरकृतोदारमाणिक्यगुच्छं


From http://sanskritdocuments.org

धम्मिल्लं ते हरिकरधृतं कर्हि पश्यामि राधे ॥ २४९॥
विचित्राभिर्भङ्गीविततिभिरहो चेतसि परं
चमत्कारं यच्छंल् ललितमणिमुखादिलसितः ।
रसावेशाद् द्वैतः स्मरमधुरवृत्ताखिलमहोऽ
द्भुतस्ते सीमन्ते नवकनकपट्टो विजयते ॥ २५०॥
अहो द्वैधीकर्तुं कृतिभिरनुरागामृतरस
प्रवाहैः सुस्निघ्धे कुटिलरुचिरः श्याम उचितः ।
इतीयं सीमन्ते नवरुचिरसिन्दूररचिता
सुरेखा नः प्रख्यापयितुमिव राधे विजयते ॥ २५१॥
चकोरस्ते वक्त्रामृतकिरणबिम्बे मधुकरस्-
तव श्रीपादाब्जे जघनपुलिने खञ्जनवरः ।
स्फुरन्मीनो जातस्त्वयि रससरस्यां मधुपतेः
सुखाटव्यां राधे त्वयि च हरिणस्तस्य नयनम् ॥ २५२॥
स्पृष्ट्वा स्पृष्ट्वा मृदुकरतलेनाङ्गमङ्गं सुशीतं
सान्द्रानन्दामृतरसह्रदे मज्जतो माधवस्य ।
अङ्के पङ्केरुहसुनयना प्रेममूर्तिः स्फुरन्ती
गाढाश्लेषोन्नमितचिबुका चुम्बिता पातु राधा ॥ २५३॥
सदा गायं गायं मधुरतरराधाप्रियेशः
सदा सान्द्रानन्दा नवरसदराधारतिकथाः ।
सथा स्थायं स्थायं नवनिभृतराधारतिवने
सदा ध्यायं ध्यायं विवशहृदि राधापदसुधा ॥ २५४॥
श्याम श्यामेत्यमृतरससंस्राविवर्णान् जपन्ती
प्रेमौत्कण्ठ्यात् क्षणमपि सरोमाञ्चमुच्चैर्लपन्ती ।
सर्वत्रोच्चाटनमिव गता दुःखदुःखेन पारं
काङ्क्षत्यह्नो दिनकरमलं क्रुध्यती पातु राधा ॥ २५५॥
कदाचिद् गायन्ती प्रियरतिकलावैभवगतिं
कदाचिद् ध्यायन्ती प्रियसहभविष्यद्विलसितम् ।
अलं मुञ्चामुञ्चेत्यतिमधुरमुग्धप्रलपितैर्-
नयन्ती श्रीराधा दिनमिह कदानन्दयतु नः ॥ २५६॥
श्रीगोविन्द व्रजवरवधूवृन्दचूडामणिस्ते
कोटिप्राणाभ्यधिकपरमप्रेष्ठपादाब्जलक्ष्मीः ।
कैङ्कर्येणाद्भुतनवरसेनैव मां स्वीकरोतु
भूयो भूयः प्रतिमुहुरधिस्वाम्यहं प्रार्थयामि ॥ २५७॥
अनेन प्रीता मे दिशति निजकैङ्कर्यपदवीं
दवीयो दृष्टिनां पदमहह राधा सुखमयी ।
निधायैवं चित्ते कुवलयरुचिं बर्हमुकुटं



From http://sanskritdocuments.org

किशोरं ध्यायामि द्रुतकनकपीतच्छविपटम् ॥ २५८ ॥
ध्यायन्तं शिखिपिच्छमौलिमनिशं तन् नाम सङ्कीर्तयन्
नित्यं तच्चरणाम्बुजं परिचरन् तन्मन्त्रवर्यं जपन् ।
श्रीराधापददास्यमेव परमाभीष्टं हृदा धारयन्
कर्हि स्यां तदनुग्रहेण परमाद्भुतानुरागोत्सवः ॥ २५९ ॥
श्रीराधारसिकेन्द्ररूपगुणवद्गीतानि संश्रावयन्
गुञ्जामञ्जुलहारबर्हमुकुटाद्यावेदयंश्चाग्रतः ।
श्यामाप्रेषितपूगमाल्यनवगन्धाद्यैश्च संप्रीणयंस्-
त्वत्पादाब्जनखच्छटारसह्रदे मग्नः कदा स्यामहम् ॥ २६० ॥
क्वासौ राधा निगमपदवीदूरगा कुत्र चासौ
कृष्णस्तस्याः कुचमुकुलयोरन्तरैकान्तवासः ।
क्वाहं तुच्छः परममधमः प्राण्यहो गर्हकर्मा
यत् तन् नाम स्फुरति महिमा ह्येष वृन्दावनस्य ॥ २६१ ॥
वृन्दारण्ये नवरसकला कोमला प्रेममूर्तिः
श्रीराधायाश्चरणकमलामोदमाधुर्यसीमा ।
राधां ध्यायन् रसिकतिलकेनात्तकेलीविलासां
तामेवाहं कथमिह तनुं न्यस्य दासी भवेयम् ॥ २६२ ॥
हा कालिन्दि त्वयि मम निधिः प्रेयसा खेलतासीद्
भो भो दिव्याद्भुततरुलतास्तत्करस्पर्शभाजः ।
हे राधाया रतिग्रहशुका हे मृगा हे मयूरा
भूयो भूयः प्रणतिभिरहं प्रार्थये वोऽनुकम्पाम् ॥ २६३ ॥
वहन्ती राधायाः कुचकलशकाश्मीरजमहो
जलक्रीडावेशाद् गलितमतुलप्रेमरसदम् ।
इयं सा कालिन्दी विकसितनवेन्दीवररुचि
च्छटा मन्दीभूतं हृदयमिह सन्दीपयतु मे ॥ २६४ ॥
सद्योगीन्द्र सुदृश्यसान्द्ररसदानन्दैकसन्मूर्तयः
सर्वेऽप्यद्भुतसन्महिम्नि मधुरे वृन्दावने सङ्गताः ।
ये क्रूरा अपि पापिनो न च सतां सम्भाष्यदृश्याश्च ये
सर्वान् वस्तुतया निरीक्ष्य परमस्वाराध्यबुद्धिर्मम ॥ २६५ ॥
यद् राधापदकिङ्करीकृतहृदा सम्यग्भवेद् गोचरं
ध्येयं नैव कदापि यद् धृदि विना तस्याः कृपास्पर्शतः ।
यत् प्रेमामृतसिन्धुसाररसदं पापैकभाजामपि
तत् वृन्दावनदुष्प्रवेशमहिमाश्चर्यं हृदि स्फूर्जतु ॥ २६६ ॥
राधाकेलिकलासु साक्षिणि कदा वृन्दावने पावने
वत्स्यामि स्फुटमुज्ज्वलाद्भुतरसे प्रेमैकमत्ताकृतिः ।
तेजोरूपनिकुञ्ज एव कलयन् नेत्रादिपिण्डे स्थितं


From http://sanskritdocuments.org

तादृक्स्वोचितदिव्यकोमलवपुः स्वीयं समालोकये ॥ २६७॥
यत्र यत्र मम जन्मकर्मभिर्नारकेऽथ परमे पदे मम ।
राधिकारतिनिकुञ्जमण्डली तत्र तत्र हृदि मे विराजताम् ॥ २६८॥
क्वाहं मूढमतिः क्व नाम परमानन्दैकासारं रसं
श्रीराधाचरणानुभावकथया स्यन्दायमाना गिरः ।
लग्नाः कोमलकुञ्जपुञ्जविलसद्वृन्दाटवीमण्डले
क्रीडच्छ्रीवृषभानुजापदनखज्योतिश्छटाः प्रायशः ॥ २६९॥
श्रीराधे श्रुतिभिर्बुधैर्भगवताप्यामृग्यसद्भवे
स्वस्तोत्रस्वकृपात एव सहजायोग्येऽप्यहं कारितः ।
पद्येनैव सदापराधिनि महन्मार्गे विरुध्य त्वदे
काशे स्नेहजलाकुलाक्षि किमपि प्रीतं प्रसादीकुरु ॥ २७०॥
अद्भुतानन्दलोभश्चेन् नाम्ना रससुधानिधिः ।
स्तवोऽयं कर्णकलशैर्गृहीत्वा पीयतां बुधाः ॥ २७१॥
स जयति गौरपयोधिर्मायावादार्कतापसन्तप्तम् ।
हृन्नभ उदशीतलयद् यो राधारससुधानिधिना ॥ २७२॥

॥ इति ॥

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2014
From http://sanskritdocuments.org .
The text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or commercial purpose without permission.



From http://sanskritdocuments.org